श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वेङ्कटशेषार्यानुगृहीता

# ॥ श्रीकोदण्डपाणिकरुणास्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोदण्डपाणिकरुणास्तुतिः ॥

वन्दे वेङ्कटशेषार्यं वत्सवंशशिरोमणिम्
वात्स्यश्रीवरदाचार्यतनयं करुणानिधिम् ॥

श्रीदंभभाजां परिहर्तुमीक्षां
पादं हरेस्संश्रयितुं सदैव।
भीदं भवं द्रावयितुं जवेन
कोदण्डपाणेः करुणां नतोस्मि ॥ **10.1** ॥

रघुवरकरुणे ! करुणा तव यदि
पुरतस्तदा किमस्त्यर्थ्यम्।
प्रभुरपि जगतां महितः स तु
भवति नुतो भवत्पदत्वेन ॥ **10.2** ॥

नेदं जगत् हरिरवेत् न च तं स्वयं सः
श्रीदं पदं भवति नो भविनां च तस्य।
मोदं परं कथमुपैतु जनः च सर्वः
कोदण्डपाणिकरुणे ! करुणां विना ते ॥ **10.3** ॥

अहो मे सम्मोहो भवति सति लब्धोदयदये -
प्युदारे श्रीदारे कृपणमिह कञ्चित् श्रितवतः।
य एष स्वप्रीत्यै निहितमपि मिथ्यास्तववचः
तथा तथ्यं मत्वा न गणयति कञ्चित् परमपि ॥ **10.4** ॥

भ्रान्तः श्रान्तस्तथाहं कृपणमुखसुखालोकलिप्सुस्तदीया -
वासाभासे वसन्तन्मुदमुदययितुं तत्र चित्राण्यवोचम्।
मन्दो मन्दामृताद्रीभवदनघदयापाङ्गसङ्गादृतस्स्वम्
मुक्त्वा मुग्धं मुखं ते मुदमपि सदनं रामचन्द्र ! क्षमस्व ॥ **10.5** ॥

सायं प्रातस्सुधर्म्यं तव मुखकमलास्वादनं कर्म नित्यम्
त्यक्त्वा सेवां तवाङ्घ्र्योरपि निखिलफलापादिनीं रामचन्द्र !।
मुग्धः कश्चित् श्रितोहं विभुरिति कृतधीः तस्य संपत्तिवृद्धिम्
वाञ्छन्नञ्चन् सदा तत् सदनमपि तथाह्यञ्चितो वञ्चितोस्मि ॥ **10.6** ॥

सुधामनि सुधामनि क्षपितदुर्गते सद्गते
किमत्र भवति स्थिते प्रभुवरेऽत्युदारे परम्।
नरं श्रयितुमाश्रयन्नहमहो महामोहतः
परं यदि तवोदयो मयि तदा दयेथा इति ॥ **10.7** ॥

आदावाश्रित्य कृच्छ्रात् कथमपि समयं प्राप्य चोक्ते निजार्थे
पश्चात् पश्चात् भवत्वित्युपजनितदराशे स्थिराशे धरेशे।
नालं ह्यायो व्ययायाश्रित इह बहुलः कालमीक्षस्व कञ्चित्
कष्टं स्पष्टं वृथेथ्यं वदति जनयसि प्रार्थनां रामचन्द्र ! ॥ **10.8** ॥

अन्यादृक्षमदीयदिव्यसुषमासेवाक्रियाद्यक्षणे
प्रध्वस्ताखिलकल्मषे नतजने पाश्चात्यसेवाफलम्।
किं कुर्यामिति चिन्तये स तु ममाजानन् मनो याचते
निश्शेषाघहतिं मुहुर्मुहुरिति स्मेरोऽसि सीतापते ! ॥ **10.9** ॥

॥ इति श्रीकोदण्डपाणिकरुणास्तुतिः समाप्ता ॥